Gyanshauryam, International Scientific Refereed Research Journal
© 2021 GISRRJ | Volume 4 | Issue 6 | ISSN : 2582-0095

# सोमनाथदाशविरचितस्य वंशीविनोदस्य आध्यात्मिकपक्षविचार:

विलता वर्मन्

शोधच्छात्री, संस्कृतविभाग:,

माहात्मागाँधीकेन्द्रियविश्वविद्यालय:

**Article Info**

Volume 4 Issue 6

Page Number: 23-28

**Publication Issue :**

November-December-2021

**Article History**

Accepted : 01 Dec 2021

Published : 10 Dec 2021

**सारांश**:-श्रीमद्भागवते श्रीकृष्णस्य वंश्या वैशिष्ट्यमाधारीकृत्य 'वेणुगीतम्' इति दशमसर्गस्य एकविंशतितमोऽध्याये वर्तते। स्तुतिमूलकं वा भक्तिमूलकं शतककाव्यमिदं श्रीकृष्णस्य वंशीमाधारीकृत्य कविना सोमनाथदाशमहाभागेन विरचितमस्ति। तत्र विद्यमान: आध्यात्मिकपक्ष: इत्यस्य विचार: मया सुकुमारमतिना विचारित:।

मुख्यशब्द: – श्रीकृष्ण:, भक्ति:, सोमनाथदास:, वंशीमाधारी, आध्यात्मिक:।

विश्वे असंख्या: भाषा: सन्ति। तासु सर्वासु भाषासु संस्कृतभाषा सर्वोत्तमा विद्यते। संस्कारयुक्ता, दोषरहिता, परिष्कृता भाषा एव संस्कृतभाषा कथ्यते। इयमेव भाषा देववाणी, सुरवाणी, गीर्वाणवाणी उच्यते। भारतीयानां विश्वासानुसारं सृष्टिकर्तु: ब्रह्मण: मुखात् वेदमयी संस्कृतवाणी निस्ससार। सम्यक् कृतम् इत्यस्मिन्नर्थे सम्पूर्वकात् डुकृञ् करणे इत्यस्माद्धातो: निष्पन्नोऽयं संस्कृतशब्द:। सम्यक् कृता भाषा एव संस्कृतमिति अस्मादेवावगम्यते। विशालमिदं संस्कृतसाहित्यस्य वाङ्गमयम्। वाङ्गमयमस्मिन् दृश्यन्ते अनेकानि दृश्यश्रव्यचम्पूनाम्नाभिधेयानि काव्यानि। तेष्वेव काव्येषु विशिष्य काव्यस्य स्थानं महत्वपूर्णमस्ति। अत: काव्यस्य विषये सर्वे एव विदिता:। तथा च दिङ्मात्रमेव वर्ण्यते। वैदिकवाङ्गमयं वा शास्त्रीयं वाङ्गमयं वा लौकिकं साहित्यं वा यदि पठ्यते तर्हि अवश्यमेव पठितृणां हितं भवति।

प्राचीनकालादारभ्येदानीं यावत् विरचितेषु काव्येषु शतककाव्यानां संख्या सर्वाधिका भवति। अत्र काव्यबन्धे महद्दाढर्यं कवीनामेव अवलोक्यते। यदि अत्र बन्धे दृढता न भवति तर्हि तत्केनापि न गृह्यते। काव्येऽस्मिन् विशिष्य शब्दार्थालङ्कारवैचित्र्यं बाहुल्येन विद्यते। काव्यसन्निवेशाच्च यथा तथा सङ्गीतनाटकं तदिति केचित्, काव्यखण्डमित्यपरे,

**Copyright: ©** the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

गेयाकृत्तिरित्यन्ये व्यवहरन्ति। यथा काव्यान्तरेषु ऋतुः, नदी, नृत्यम्, रतोत्सवः, स्त्रीणां शृङ्गारभावः, सूर्यचन्द्रयोः वर्णनम्, इत्यादिविषया : समाविष्टाः सन्ति, तथैव शतककाव्येषु इमे विषया : अपि प्रतिपाद्यन्ते।

एवं विविधलक्षणोपेतं शतककाव्यं बहुधा जनानामाकर्षणस्य केन्द्रभूतं भवति। जनानां रुचिः महाकाव्याद्यपेक्षया, दीर्घपदबन्धगद्यकाव्यापेक्षया शतककाव्येषु अधिकतया अवलोक्यते। प्रस्तुते शोधलेखे केवलं श्रीजगन्नाथतत्त्वमाधारीकृत्य विरचितानां भक्तिमूलकसंस्कृतशतककाव्यानां चर्चा विधास्यते। अग्रीमाध्याये प्रसङ्गतः आप्राचीनकालादारभ्य इदानीं यावत् विरचितानां संस्कृतशतककाव्यानां सामान्यपरिचय : प्रस्तोष्यते।

शतककाव्यानि आदौ रचितवान्। यथा – (1) नीतिशतकम् (2) शृङ्गारशतकम् (3) वैराग्यशतकञ्च। डॉ.कपिलदेवद्विवेदिमहोदयाः भर्तृहरेः प्रशंसां कृत्वा लिखन्ति– नीतिशृङ्गारवैराग्यैः स्वानुभूतिमयैर्गुणैः। शतकत्रयकर्ताऽसौ काव्याब्धिरससारधृक्।। तदनन्तरं अमरुककविः शृङ्गाररसस्य सर्वोत्कृष्टोदाहरणत्वेन "अमरुशतकं " विरचयामास। ततः पण्डितभोलानाथ आचार्यः, श्रीस्वयंप्रकाशशर्मा, श्रीजगन्नाथव्यासः, श्री.एस्.सुन्दरराजन्, श्रीशेषस् कविः, आचार्य : रमेशचन्द्रशुक्लः, श्रीजगन्नाथरिबुशास्त्री, श्रीराधावल्लभः, श्रीकुरनारायणमुनिः, **श्रीसोमनाथदाश** इति प्रमुखा : प्रसिद्धाः भवन्ति।

स्तुतिमूलकं वा भक्तिमूलकं शतककाव्यमिदं श्रीकृष्णस्य **वंशीमाधारीकृत्य** कविना सोमनाथदाशमहाभागेन विरचितमस्ति। तस्मिन् **विद्यमानमाध्यात्मिकं चिन्तनं मया शोधलेखेस्मिन् विवरणं दीयते।**

भारतीयधर्मग्रन्थेषु श्रीमद्भागवतं कृष्णरसपिपासूनां कृते एकं वलिष्ठं साधनम्। शृङ्गार–हास्य–करुण–रुद्र–वीर–वीभत्स–भयानकशान्तादिरसैः रुचिरेऽस्मिन् ग्रन्थे वैष्णवधर्मदेवस्य कृष्णस्य लीलाः सुन्दरमनोहरशैल्या वर्णिताः। शङ्ख–चक्र–गदा–पद्मधारी विष्णुः कृष्णरूपेण द्वापरे जनिं लब्ध्वा स्वलीलाः सम्पादयामास। तासु लीलासु वृन्दावने रासलीला शृङ्गारलीला वा अन्यतमा। वसन्तागमनेन सह श्रीकृष्णः वृन्दावनस्य रमणीयवनान्तराले प्रविश्य गोपिकाभिः शृङ्गाररसं कृतवान्। हस्ते स्थितया वंश्या सर्वाः महोयति स्म। वंशी तु तस्य शृङ्गारयुद्धे तीक्ष्णं कामास्त्रमासीत्। कश्चन कविः लिखति–

**पाषाणं भूशकर्कशं तरलयत्सार्द्धं विशुषकेन्धनैः**

**श्वेताभिः स्वलयत्सहैव जघनादाभीरनर्याम्बरम्।**

**कालिन्द्याः स्थगयन् जलानि सहसा हिंस्रैमृगैरपडजै-**

**र्वक्रभ्रूमुगण्डहस्तवचनं तर्हणुगीतं मुदे॥**

श्रीमद्भागवते श्रीकृष्णस्य वंश्या वैशिष्ट्यमाधारीकृत्य 'वेणुगीतम्' इति दशमसर्गस्य एकविंशतितमोऽध्याये वर्तते। श्रीकृष्णस्य यदा शुष्कनिर्जीवशून्यसप्रस्ध्याः वंश्याः छिद्रेषु स्वमुखजातवातं प्रवेशयति तदा तस्याः सुमधुरस्वनः जातः सन् चतुर्दिक्षु व्याप्नोति। प्रकृतिः तस्य नादस्य ताले ताले नृत्यति। मयूराः, मृगाः, गावः साश्चर्य मुरलीनिदानेन मुग्धा भवन्ति। सा शून्योदरी। तस्याः हृदयं शून्यम्। योगी यथा वाताहारी भवति तथैव दिव्यवातस्तस्या भोजनम्। छुरिकाधारेण कर्तितस्य, ग्रीष्मरौद्रेण उत्तप्तस्य, वर्षाजलेणाभिषिक्तस्य, शीतकम्पितस्य वंशदण्डस्य सा सहोदरी। बहुकष्टेन स्वीकृतस्वरूपा वंशी दीर्घजन्मजन्मान्तरतपरसाधनया प्राप्तकृष्णानाम् ऋषीणामपेक्षया अधिकसुखसाधिकैव भाति। पथभ्रान्तमनुष्याणां कृते किमपि अपूर्वमुल्लासमयं जीवनदर्शनं ददाति। प्रकृतेः गर्भसम्भवा सा स्वस्वरझङ्कारैः प्रकृतिं नर्तयति। वन्ये पशवः तस्याः स्वनेन स्तब्धाः। मयूर नृत्यति। सिंहः आनन्देन गर्जति। काकली नूपुरझङ्कारं सृजति। मेघः मृदङ्गनादं करोति। कालिन्दीनदीपर्वतझर्झराश्च जलकल्लोलै वीणास्वनं जनयन्ति। मृगाः, गाव : आस्फालितलोचना कृष्णं पश्यन्ति। गोपाः मनोरञ्जयन्ति। गोप्य : ईर्ष्यान्विताः भवन्ति। राधा हृदयं कदाचिज्ज्वलति कदाचिच्च कृष्णं प्रशंसति। सम्पूर्णवृन्दावनं वंश्या नादेन सुरतोत्सवं विदधाति।

श्रीमद्भागवतं भारतीयधर्मग्रन्थेषु एकः भगवत्कृष्णाधारीकृतः प्रकृष्टतमः ग्रन्थः। कृष्णैव युगे युगे भिन्नैः रूपैः अवतीर्तवान्। परमात्मनः स्वरूपं भवति श्रीकृष्णः। तस्य वंशीवादकस्य वंशीमाधारीकृत्य कविना शतकमिदं रचितम्। अतः स्तुतिपरकं काव्यशास्त्रमिदमद्वैतपरमित्यत्र नास्त्यत्र संशयः।

**राधैकदा वदति कृष्ण ! वद त्वदीया वंशी कथं भवति सा वनिताग्रगण्या।**

**किं वा महत्त्वमधिकं गुणगौरवं वा निर्जीवशुष्करसहीनलतासमीपे।।**

**कृष्णस्तदा वदति हे व्रजगोपि ! राधे ! येषां मनो मदमलैः कलुषं न शून्यम्।**

**क्रोधैरशान्तिशठमत्सरकाममोहैः पूर्णं न मे भवति तद्धृदयेऽधिवासः।।**

**शून्यं हि मे भवति वासगृहं भवेऽस्मिन् शून्यं च मे गगनविस्तृतविश्वरूपम्।**

**शून्याकृती च भुवने रविचन्द्रबिम्बौ शक्तिश्च तत्र निहिता न पुनः परेषु।।**[1]

[1] वं.वि- 18-20

राधाया: पृच्छासीत् – त्वदीया वंशी कथं भवति सा वनिताग्रगण्या, किं वा महत्त्वम् अधिकं गुणगौरवम्। तत्र कृष्णकथनम्- येषां मनः न शुन्यमपितु मदमलैः कलुषम्। यत्र शुन्यता विद्यते तत्रैव परमात्मनःअधिवासो भवति। प्रसङ्गाद् उच्यते ब्रह्मविषयः- अद्वैतीनां मते निर्विकल्पकः, निरुपाधिकः, निर्विकारः निरतिशयबृहद्रूपः आत्मैव ब्रह्मपदेनोच्यते। तच्च ब्रह्म निर्गुणसगुणरूपेण द्विविधम्। तादृशब्रह्मस्वरूपं लिलक्षयिषुः, स्वयमाचार्यः स्वरूपलक्षणं, तटस्थलक्षणञ्चेति लक्षणद्वयं तनुते।

**स्वरूपं सद् व्यावर्त्तकम्** इति स्वरूपलक्षणम्। यथा –**सत्यं ज्ञानमनन्तं ब्रह्म**[2] इति, **विज्ञानमानन्दं ब्रह्म**[3] इति।।

यावल्लक्ष्यकालानवस्थितत्वे सति यत् व्यावर्तकं तत् तटस्थलक्षणमिति। यथा – **जगदुत्पत्तिस्थितिलयकारणं ब्रह्म** इति ब्रह्मणः तटस्थलक्षणम्। अत्र – **यतो व इमानि भूतानि जायन्ते। येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद् ब्रह्मेति**[4]**।** इति श्रुतिप्रमाणम्। अद्वैतमते ब्रह्म सजातीयविजातीयस्वगतभेदशून्यमस्ति। तस्मादुक्तं – **सदेव सौम्यम् इदमग्र आसीत् एकमेवाद्वितीयम्।** [5]इति। अदैतसिद्धान्तानुसारं जीवब्रह्मणोः ऐक्यात् आत्मैव ब्रह्म। तत्र महावाक्यम् **अयमात्मा ब्रह्म** [6]इति। वेदान्ते निर्विकल्पकं, निरुपाधिकं, निर्विकारं व्यापकत्वेन आसत्तियुक्तं ब्रह्मपदेनोच्यते। यद्यपि शास्त्रेषु सगुणनिर्गुणब्रह्मरूपेण द्विविधं प्रतिपाद्यते तथापि उपनिषत्प्रतिपादितं निर्गुणब्रह्म एव शाङ्करभाष्यसम्मतमस्ति। नित्यशुद्धबुद्धमुक्तस्वभावरूपं सच्चिदानन्दरूपैकमेवाद्वितीयं ब्रह्म भवति। ब्रह्मस्वरूपबोधकानि सत्यज्ञानादिपदानि ब्रह्मणः विशेषवाचकानीति न वाच्यम्। तानि गुणवाचकानि इत्यपि न वाच्यम्, धर्मरूपाण्यपि न, ब्रह्मणः निर्गुणनिर्धमत्वात्।

सर्वेषामपि सामान्यजनानां ब्रह्मणः स्वरूपज्ञाने कष्टकरं भवति इत्यतः सुलभबोधाय अधुना तस्य तटस्थलक्षणमुच्यते, यस्मादस्य जगतः सृष्टिः, यस्मिन् स्थितिलयौ च भवतः, तद् ब्रह्म इति। लक्ष्यं यावत्कालं वर्तते तावत्कालम् अविद्यमानत्वे सति इतरभेदं बोधयतीदं तटस्थलक्षणम्। अद्वैतीनां प्रतिपादितः नित्यशुद्धमुक्तस्वभाव एव आत्मा ब्रह्मेति गीयते। अतः तद्व्यतिरेकेण यत्किञ्चिदनुभूयते तत्सर्वं प्रातीतिकमेवास्ति। ततश्च ईद्दशं नित्यशुद्धवादमुक्तस्वभावं ब्रह्म तदेव आत्मा इति उपनिषदां सिद्धान्तः इति।

2 तैत्ति.उ.-2.1
3 बृह. उ. -3.9.18
4 तै.उ.-3.1
5 छा. उ. -6.2.1
6 मु उ 2

शुन्यविषये वदति स- अस्माकं विस्तृतं विश्वरूपं गगनमपि शून्यं, रविचन्द्रयोः प्रतिविम्बावपि पृथिव्यां शून्याकारेण चित्रितं दृश्यते। तत्रैव परमात्मानः शक्तिः निहिता। कृष्णात्मने न तिष्ठन्ति हिंसादयः गुणाः। तथा वंशी अपि शून्या भवति। यतो हि न तिष्ठन्ति सप्तरन्ध्रेषु केवलं शून्योदर्याः केशवमुखाधरः चुम्बितवान्।

कृष्णवंशी शान्तिं प्रददाति। अतः गोपलेन पालिताः गावः वंशीशब्दं श्रुत्वा शान्तिमप्राप्नुवन्। इयं वंशी युद्धकाले पाञ्चजन्यरूपेण व्यवह्रियते।सा रासकाले रतिरागिनि इति नाम्ना परिचीयते, रौद्ररसैः युक्ता सन्ती सा शङ्खरूपेण व्यवह्रियते। अर्थात् इयं वंशी सर्वत्र भिन्नैः उपाधिभिः भेद्यते।अर्थात् सा परमात्मा भवति।

**गोपालपालितगतागतधेनुवर्गं गोपालवर्गवरसुन्दरकामरूपः।**

**गोपालघोषपरिवेष्टितकाननेऽसौ सम्प्राह्वयत्यनुभवी मुरलीनिनादैः।।**

वंश्यां विष्णोः जगत्कार्याणि आरोप्यन्ते। वंश्याः निनादकर्म न स्वार्थं भवति अपि तु स परममोदनार्थं वादयति स्वं निजम्। वंशी संहारूपकार्ये अपि पटुः, स कष्णः तया वंश्या एव असुरान् समस्तान् संहरति। अर्थात् सर्वेषु कार्येषु भगवान् कृष्णः तस्य उपयोगं करोति।

**मायामयावरणभेदपुरस्सरं तद् वेदान्तदर्शनपरात्परसूक्ष्मतत्त्वम्।**

**"ब्रह्मैव नापररस : " जगतस्सुसत्यं वंश्या विभावितमिदं ननु कुण्डलिन्याम्।**

**कैवल्यकैरवविकासनचन्द्रिका त्वं चित्तं नियोजयसि शान्तितटे तडागे।**

**दु:खं विनाशयसि वंशि ! सुखं तनोषि पीडाजदु : खशमनं सहसा करोषि।** [7]

गगने यथा सूर्यः उतित्थ्वा किरणानि विकीर्य संसारे सर्वकार्ये ज्योतिर्ददाति तदवत् सर्वे मनुष्याः नन्दति वंशीम्। अनेन श्लोकार्थेन जगत्कारणम् सा वंशी इति प्रतिपाद्यते। अत्र अद्वैतमतमुपस्थाप्यते।

**प्रातस्तव ध्वनिधुरे ! ध्वनिमाप्य सूर्य उत्तिष्ठते हि गगने किरणान् विकीर्य।**

**संसारसंसरणकारणकार्यभूते ! त्वामेव नन्दति ततस्सकलो मनुष्यः।।**[8]

[7] 43-44

[8] वं.वि-45

वंश्या: आध्यात्मिकता वर्ण्यते। एषा वंशी तपसि प्रशान्तरसरागतरङ्गशक्त्या सर्वेन्द्रियाणि मनश्च दमयति तत: कृष्णं समाधौ योगविधौ च नियोजयति।

**वंशीस्वनस्तपसि चित्तकुवृत्तिरोधं कृत्वा प्रशान्तरसरागतरङ्गशक्त्या।**

**सर्वेन्द्रियाणि च मनो दमयन् दुराशं कृष्णे नियोजयति योगविधौ समाधौ।।**[9]

समाधौ च तापस: अनया वंश्या वेदान्तदर्शनपरात्परसूक्ष्मतत्त्वं ब्रह्मैव नापररस: इति सर्वमनुष्याङ्खातिं जगतस्सुसत्यं विभावितम्। अत्र योगसाधक: भवति वंशी।

**ग्रन्थिं विभेदयसि गात्रगतं सुसूक्ष्मं दिव्यं प्रकाशयसि कुण्डलिनीप्रकोष्ठम्।**

**तस्मिंश्च पद्मकलिकां प्रविकास्य नादैरष्टाङ्गयोगनियमान् सफलीकरोषि।**[10]

जगत: कारणं यथा माया भवति तद्वत् अत्र शरीरसृष्टौ अपि माया एव कारणीभूता। सा च माया वंश्या: धीरवात: विभावयति। तच्च कृष्णमुखाद् जायते। अर्थात् कृष्ण: अत्र व्यापार:, कारणं च वंशी। नारीणां सर्वं दु:खञ्च सा विमोहयति। तद्यथा प्रोच्यते षोडशे श्लोके। अनेन अद्वैतमते सृष्टिवाद: कथित:।

**सन्दर्भग्रन्थसूची-**


- अलङ्कारशास्त्रस्येतिहास:, डॉ. जगदीशचन्द्रमिश्र:, चौखम्बा संस्कृत प्रतिष्ठानम्, वाराणसी 1986
- अलङ्कारशास्त्रेतिहास:, डॉ. जगदीशचन्द्रमिश्र:, चौखम्बा संस्कृत प्रतिष्ठानम्, वाराणसी 1999
- वंशीविनोद: डॉ. सोमनाथदाश:, संस्कृताग्रिमगवेषणाप्रतिष्ठानम्, पुरी उडिशा, 2011
- विष्णुपूराणम् व्यास:,गीताप्रेस, गोरखपुर:
- संस्कृतसाहित्यस्य इतिहास: प्रो. हरेकृष्णशतपथी किताबमहल, कटक 1998
- सरस्वतीकण्ठाभरणम् भोजदेव: डॉ. विश्वनाथगो शास्त्रीपरिमल पब्लिकेसन्, दिल्ली
- भक्ति रसायनम्, देवकीनन्दनग्रन्थालय: 1969


[9] तत्रैव-46

[10] तत्रैव 47